Serving JinShasan
073275
gyanmandir@kobatirth.org

॥ श्री जिनायनमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

# ॥ चेल्लणामहासतीचरित्रं ॥

( कर्ता—श्रीशुभशीलगणि )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीजैनभास्करोदय प्रिन्टिंग प्रेस—जामनगर.

सने १९२९ मूल्य रु. ०-८-० सां. १९८६

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीचेल्लणामहासतीचरित्रं प्रारभ्यते ॥

( कर्ता—श्रीशुभशीलगणी ॥

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

पालयन् रुचिरं शीलं । शुद्धभावेन देहमान् ॥ चेल्लणेव समाप्नोति । कल्याणकमलां किल ॥ १ ॥

तथाहि—विशालायां नगर्यां चेटीकृतानेकारातिश्चेटकाभिधो जैनधर्मधुरंधरो राजा राज्यं करोतिस्म. स च न्यायपुरस्सरं निजराज्यं पालयन् सकलां निजप्रजां सर्वदा प्रीणयामास. तस्य राज्ञः पृथक् पृथक् राज्ञीकुक्षिसमुद्भवाः शुभस्वप्नैश्च सूचिताः सप्त कन्या अभवन्. क्रमात्तासु प्रभावत्यभिधाना प्रथमा पुत्री वीतभयनगरस्वामिन उदायनाख्यभूपतेर्दत्ता १. द्वितीया पद्मावत्यभिधा पुत्रा चंपाधीशस्य दधिवाहनाख्य-

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

स्य भूपतेर्दत्ता २. तृतीया मृगावती कौशांबीनाथस्य शतानीकाख्यस्य नृपतेर्दत्ता ३. चतुर्थी शिवाख्या तनया उज्जयिनीस्वामिनः प्रद्योतनाख्यस्य भूपतेर्दत्ता ४. पंचमी ज्येष्ठाख्या पुत्री कुंडग्रामाधिपस्य श्रीवीरप्रभुज्येष्ठभ्रातुर्नंदिवर्धनस्य दत्ता ५. षष्ठी सुज्येष्ठा, सप्तमी च चेल्लणाऽद्यापि कुमारिके एव राजभुवने तिष्ठतःस्म. ते द्वे अपि कन्ये रतिप्रीतितुल्ये अतुल्यरूपश्रियं धारयंत्यौ धर्मकार्यकुशले बभूवतुः. सकलकलाकलापकुशले ते द्वे अपि मिथः परमप्रीतियुते साक्षात् मूर्तद्वयरूपे सरस्वत्याविव रेजतुः. अथान्येद्युस्ताभ्यां सुज्येष्ठाचेल्लणाभ्यामलंकृते शुद्धांतःपुरे कापि स्थविरा मिथ्यात्विनी तापसी समागता. सा च तयोरग्रे शिवधर्मोपदेशं दातुं लग्ना, तया च तस्य शिवधर्मस्य महती प्रशंसा कृता. परं जैनधर्मदृढहृदया सुज्येष्ठा तयोक्त शिवधर्मं तिरस्कारयामास. यथा—कूपे स्यादधमं स्नानं । वापीस्नानं च मध्यमं ॥ तडागे वर्जयेत् स्नानं । नद्यां स्नानं न शोभनं ॥ १ ॥ गृहे चैवोत्तमं स्नानं । नदीस्नानं तु मध्यमं ॥ कूपे चाप्यधमं स्नानं । तडागे नैव कारयेत् ॥ २ ॥ इत्याद्युक्त्वा तया सुज्येष्ठया जिनधर्मे स्थापिते सति क्रुद्धा सा तापसी उल्लंठतया यथातथा जल्पितुं लग्ना, जिनधर्मस्य च निंदां कर्तुं प्रवृत्ता. तदा कोपातुराभ्यां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ताभ्यां सा तापसी निजचेटिकापार्श्वाद् अर्धचंद्रप्रदानेन गले गृहीत्वा निजांतःपुराद् बहिर्निष्कासिता. ततः फालच्युता व्याघ्रीवातीवकोपातुरा सा तापसी एवमलब्धसन्माना प्राप्तपराभवा च दध्यौ, नूनं सा सुज्येष्ठा निजवैदुष्यगर्विता विद्यते, अथ तामहं केनाप्युपायेन सपत्नीसंभवे भूरिदुःखे पातयामि. इति ध्यात्वा परमं द्वेषं प्राप्ता सा तापसी तस्याः सुज्येष्ठायाः सविशेषं स्वरूपं केनापि कुशलेन चित्रकारेण पट्टे समालेखयामास. ततः सा तं चित्रपट्टं समादाय राजगृहे नगरे समागता. केनाप्युपायेनासौ तापसी तत्र श्रेणिकनृपं मिलित्वा तं चित्रपट्टं दर्शयामास. अथ तत्र चित्रपट्टे समालेखितं तस्याः सुज्येष्ठाया मनोहरं स्वरूपं दृष्ट्वा स श्रेणिकनृपो दध्यौ, किमेषा सुरांगना? किं वा कापि पातालकन्या वर्तते? इत्यादि विचिंत्य कामविह्वलः स नृपस्तां तापसीमपृच्छत्. भो तापसि! अत्र चित्रपट्टे या सुंदरी त्वया चित्रितास्ति, सा किं कापि विद्यमानास्ति? वा त्वया किं कृत्रिममेव स्वरूपं स्वचित्रकलाप्रदर्शनायालेखितमस्ति? तत् श्रुत्वा तापस्या प्रोक्तं. हे राजन्! इयमालेखिता सुंदरी विद्यमानैव मयालेखितास्ति, न चेदं कृत्रिमं स्वरूपं वर्तते. तत् श्रुत्वा राज्ञा तस्यै पुनः पृष्टं. तदैषा कस्य पुत्री विद्यते? तथैव सा किं

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

परिणीता वा कुमारी विद्यते ? तापसो प्राह, राजन् ! वैशालीनगराधीशस्य चेटकाख्यभूपस्येयं सुज्येष्टाख्या तनया वर्तते, तस्या एव चेदं स्वरूपं मया चित्रितमस्ति. किंचेयमद्यापि कुमार्येव वर्तते, नुनं त्वमेव च तामुद्वोढुमर्हसि. तत् श्रुत्वा हृष्टोऽसौ श्रेणिकनृपस्तां तापसीं दानेन संतोष्य विससर्ज. अथ तच्चित्रदर्शनतोऽत्यंतं मन्मथविह्वलीभूतस्तां सुज्येष्टामुद्वोढुकामो नृपः शून्यचित्त इवाजनि. ततोऽसौ चेटकनृपपार्श्वे चतुरमेकं दूतं प्रेष्य तां सुज्येष्टां मार्गयामास, परं स चेटकनृपो दूतं जगाद, भो दूत ! अहं मदीयां पुत्रीं सुज्येष्टां श्रेणिकनृपाय दातुं नेच्छामि. तदा स दूतोऽपि पश्चादागत्य चेटकोक्तं वचनं श्रेणिकभूपाय निवेदयामास. तदाकर्ण्यासौ भृशं खिन्नोऽभूत्. अथैवं म्लानमुखं निजजनकं विलोक्यैंगिताकारेण च तस्य मनोगतं भावं विज्ञायाभयकुमारो विहितांजलिरवदत्, भो तात ! त्वं खेदं मा कुरु ? अहं केनाप्युपायेन भवतां सभोहितं साधयिष्यामि. एवं वैनयिक्या बुध्ध्या निजतातं संतोष्याभयकुमारो निजगृहे समायातः. निजतातमनोरथपूरणाय चैकं चित्रकलाकुशलं चित्रकारं समाह्वयत्, तं च निजजनकस्य श्रेणिकनृपस्य मनोहरं स्वरूपं चित्रपट्टे चित्रयितुमादिशत्. तदाज्ञानुसारेण स चित्रकारोऽपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तोकैरेव दिनैरतीवसुंदरं श्रेणिकनृपस्वरूपं चित्रपट्टे चित्रयित्वाऽभयकुमाराय समर्पयत्. तन्मनोहरं चि-
त्रितस्वरूपं विलोक्य संतुष्टोऽभयकुमारस्तस्मै चित्रकाराय सन्मानपुरस्सरं भूरि द्रव्यं ददौ. अथ स्वकीय-
वेषपरावर्तनं विधाय वणिग्वेषं च कृत्वा स वैशालीनगर्यां समायातः. तत्र च स भूपांतःपुरनिकटे भाट-
केनैकमापणं जग्राह. आपणे च विविधसुगंधिद्रव्याणि, मनोहरदर्पणान्, सुगंधितैलानि, मनोहरचीवरा-
दीनि महिलागणहृदयाकर्षणाय स्थापयामास. अथ तत्र क्रयार्थमागतानामंतःपुरचेटीनां स्वल्पेनैव मू-
ल्येनभूरि सुगंधिद्रव्यतैलादीनि सोऽर्पयामास. तेन सर्वा अप्यंतःपुरदास्यस्तस्यैवापणात्तानि वस्तूनि जगृहुः.
ततः कियद्दिनानंतरं सोऽभयकुमारः पटे चित्रितं तत्श्रेणिकनृपस्वरूपं निजापणद्वाराग्रे प्रलंबितं स्थाप-
यामास. इतो वस्तुक्रयार्थं तत्र समागता सुज्येष्ठाया दासी प्रलंबितं तं मनोहरं चित्रपटं दृष्ट्वा प्राप्तकौ-
तुकाऽभयकुमारं पप्रच्छ, भो वणिगुत्तम! कस्येदं मनोहरं स्वरूपं विद्यते? अभयेनोक्तं, इदं हि मदीय-
स्वामिनः श्रेणिकभूपस्य स्वरूपमालेखितं वर्तते. ततो गृहीतसुगंधिद्रव्यजाता सा दासी सुज्येष्ठायाः स-
मीपे समेत्य तच्चित्रस्वरूपवार्तामकथयत्. तदा कौतुकोत्ताला सा सुज्येष्ठापि तच्चित्रपट्टदर्शनातुरा दासीं

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्राह, भो दासि! विलोकनार्थं तच्चित्रपट द्रुत तस्य वणिजः पार्श्वात्त्वं समानय? एवं तयादिष्टा सा दास्यपि द्रुतमभयकुमारपार्श्वे समागत्य निजस्वामिन्या विलोकनार्थं तं चित्रपटं मार्गयामास. निजप्रयत्नस्य भाविसाफल्यं मन्यमानोऽभयकुमारोऽपि तस्यै तं चित्रपट्टमर्पयामास. अथ दास्यानीतं तं चित्रपटं विलोक्य प्रेमैकपरायणा सुज्येष्टा व्यचिंतयत्; नूनमयं श्रेणिको नृपो विधात्रा कस्मिंश्चिन्निवृतिदिने एव घटितः संभाव्यते. एवंविधं रूपलावण्यादिगुणगुणोपेतं स्वरूपं मया कस्यापि पुरुषस्य विलोकितं नास्ति. अथाहं केनाप्युपायेनैनमेव श्रेणिकभूपं परिणेष्यामि. इति ध्यात्वा तया तस्यै दास्यै प्रोक्तं, भो दासि! त्वयि मम संपूर्णो विश्वासो वर्तते, अतस्त्वया मदीयोऽभिलाषः कस्याप्यन्यस्याग्रे न वक्तव्यः, अथ त्वमेनं चित्रपटं तस्मै वणिजे पश्चात्समर्प्य कथयस्व? यथा मम स्वामिनी सुज्येष्टा श्रेणिकभूपं परिणेतुमिच्छति. अतस्त्वं केनाप्युपायेन तस्या मनोरथं सफलीकुरु? एवं सुज्येष्टादिष्टा सा दासी द्रुतमभयकुमारपार्श्वे समागत्य तं चित्रपटं च तस्मै पश्चात् समर्प्य निजस्वामिनीमनोरथं रहसि कथयामास. तत् श्रुत्वा प्रसन्नवदनेनाभयकुमारेण प्रोक्तं, भो दासि! नूनमहं तव स्वामिन्या मनोरथमवसरे पूरयिष्यामि.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दास्यापि तदुक्तं निजस्वामिन्यै सुज्येष्ठाय ज्ञापितं. तत् श्रुत्वा हृष्टा सुज्येष्ठापि तमवसरं विलोकमाना स्थिता. ततोऽभयकुमारेण प्रच्छन्नं तदीयांतःपुरावधि पृथ्व्यंतरेका सुरंगा कारिता, निजजनकाय श्रेणिकाय च ज्ञापितं, त्वया इतस्तृतीयेऽह्नि प्रच्छन्नमस्यां सुरंगायामागंतव्यं. तत्रागता सुज्येष्ठा च त्वां परिणेष्यति. ततस्तेन दास्यै प्रोक्तं, त्वदीया स्वामिनी इतस्तृतीये दिनेऽस्यां सुरंगायामागच्छतु, तत्र स्वयमागतः श्रेणिकभूपस्त्वां निजनगरे नेष्यति, अथ परमानंदं प्राप्तः स श्रेणिकनृपो निजांगरक्षकैर्द्वात्रिंशद्भिः सुलसायाः सुतैर्युतो रथारूढो निश्चितदिने सुरंगायां समायातः.

अथ गमनोत्सुकां चलचित्तां च सुज्येष्ठां विज्ञाय चेल्लणा तामपृच्छत्, भो भगिनि! अद्य त्वं कथं चलचित्ता विलोक्यसे? कुत्र गमनोत्सुका जातासि? तत् श्रुत्वा सुज्येष्ठयाऽलीकं जल्पितं, अहं तु कुत्रापि गमनोत्सुका नास्मि. परं तदीयहृदयभावज्ञानविदग्धा चेल्लणा पुनरपि जगौ, भो भगिनि! त्वं सत्यं कथयस्व? अद्य यावन्मया त्वत्तः किमपि गूढं रक्षितं नास्ति, त्वं चेत्तं मत्तः प्रच्छन्नं किं रक्षसि? एवं सनिर्बंधं तया पृष्टा सुज्येष्ठा तस्यै निजहृदयाभिलाषं जगौ. तत् श्रुत्वा चेल्लणावदत्, अरे भगिनि!



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अहं त्वांविना क्षणमपि स्थातुं समर्थानास्मि. अतोऽहमपि त्वया त्वत्साधंमेव रथे समारोपणीया. इत्यु-
क्त्वा सापि सुज्येष्टया सममेव सुरंगायां प्रविष्टा, श्रेणिकस्य रथे च समारूढा. इतः सुज्येष्टा चेल्लणामा-
वदत्, मया मदीया रत्नकरंडिका विस्मृता, अतस्तां समादायाधुनैवाहं पुनरागच्छामि, इत्युक्त्वा सा र-
त्नकरंडिकामादातुं पुनरंतःपुरमध्ये गता. इतस्तां चेल्लणां रथाधिरुढां सुज्येष्टामेव मन्यमानैस्तैः सुभटैः
श्रेणिकाय प्रोक्तं, हे स्वामिन्! अत्र वैरिगृहे चिरं स्थातुं न युक्तं, ततो रथं द्रुतं पश्चाद्वाहयत? तत् श्रुत्वा
रथस्थचेल्लणायुतः श्रेणिकभूपो द्रुतं रथाश्वान् निजपुरंप्रति घोरांधकारायां सुरंगायां वाहयामास. इतो र-
त्नकरंडिकां समादाय तत्रागता सुज्येष्टा श्रेणिकरथमप्रेक्ष्य व्याकुलीभूता, म्लानमुखा, स्वभगिनीवियोग-
पीडिता च प्रोच्चैस्तरं गाढं पूत्कारं कर्तुं लग्ना. एवं सुज्येष्टाया रुदनस्वरं श्रुत्वा तत्रागतश्चेटकभूपश्चेल्ल-
णाया हरणं विज्ञाय स्वयं सन्नह्य वैरिपृष्टे गंतुं सुरंगायाः पार्श्वे समायातः. इतस्तस्य सैन्याधिपो वरमि-
काभिधो महासुभटस्तत्रागत्य चेटकंप्रत्यवदत्, हे स्वामिन्! अहमेव तस्य वैरिणः पृष्टे गत्वा, तं च ह-
त्वाधुनैव चेल्लणां पश्चादानयिष्यामि, इत्युक्त्वा स रथस्थो भूरिवेगेन श्रेणिकपृष्टे सुरंगायां चचाल. ततः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुरंगायामेव युद्धं कुर्वता तेन श्रेणिकांगरक्षका सुलसाया द्वात्रिंशत्पुत्रा हताः. इतः श्रेणिकनृपोऽप्यतिवेगेनाश्वो प्रेरयन् सुरंगाया बहिर्निःसृत्य राजगृहंप्रत्यचालीत्. वैरंगिकश्च निष्फलीभूतो म्लानास्यः पश्चात्समायातः. अथ चेल्लणावियोगात् खिन्ना सुज्येष्ठा स्वमनोरथं चालभमाना विषयेभ्यो विरक्ता पितरमापृच्छ्य चंदनार्यायाः समीपे प्रव्रज्यामुपाददे. अथ मार्गे सुज्येष्ठाया अभिधानेनाह्वयंतं श्रेणिकंप्रति चेल्लणावदत्, स्वामिन्! सुज्येष्ठा तु न समायाता, तत्कनिष्ठा भगिनी चेल्लणाभिधानाहं समागतास्मि. तत् श्रुत्वा श्रेणिको व्याजहार, तर्हि मुधैव मम प्रयासोऽभूत्. तदा चेल्लणा जगौ, स्वामिन्! अहमपि तस्या एव कनिष्टा भगिनी तव वल्लभा जातास्मि. तत् श्रुत्वा श्रेणिकोऽपि तस्यांश्चेल्लणाया लाभादपि स्वं कृतार्थं मन्यमानः परमानंदं प्राप्तः क्रमेण राजग्रहे नगरे समायातः. सर्वेषामपि सुलसापुत्राणां च मरणं निशम्य स युगपदेव हर्षविषादाभ्यामालिंगितः. ततः श्रेणिकभूपो महोत्सवेन तां चेल्लणां पर्यणैषीत्. अथ निजपुत्राणां मरणं निशम्य सुलसातीवविलापं चकार. परमभयंकुमारस्तामनित्यभावनाभिन्नैः कोमलैर्वचनामृतैराश्वासयामास. अथ चेल्लणाया विनयादिगुणैरतीवसंतुष्टः श्रेणिको नृपस्तस्याः कृते एकस्तंभमावासं कारयितुं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजपुत्रमभयकुमारं समादिदेश. ततोऽभयाराधितः सुरतस्तथैवैकस्तंभमावासं सर्वर्तुफलवाटिकायुतं चकार. अथ तस्मिन्नावासे वसंती चेल्लणाराज्ञी एकाग्रचित्ता जिनपूजां कुर्वंती धर्मध्यानं करोतिस्म. क्रमेण सा चेल्लणाराज्ञी शीलपालनविषये तथा दृढचित्ताभूत्, यथा जिनाधीशः श्रीवीरप्रभुः सुलसाया इव तस्या अपि श्लाघां करोतिस्म. अथैकदा श्रीमहावीरः प्रभुस्तत्र राजगृहे नगरे उद्याने समवसृतः. श्रेणिकश्च चेल्लणादिपरिवारयुतो जिनवंदनार्थमुद्याने चचाल. इतो मार्गे कमपि जिनकल्पिसाधुं कायोत्सर्गस्थं चेल्लणायुतः श्रेणिकोऽवंदत. अथ समवसरणस्थं प्रभुं वंदित्वा श्रेणिकनृपः परिवारयुतः प्रभोर्धर्मदेशनां शुश्राव. ततो निजस्थाने समेत्य संध्याकार्यं समाप्य नृपतिर्निशायां सुप्तः. इतो निद्राधीना चेल्लणा स्वप्नावस्थायां, गतदिने मार्गे कायोत्सर्गस्थं तं साधुं संस्मृत्य मुखतो जगाद, अहो ! अस्मिन् कराले शीतकाले तस्य कावस्था भविष्यतीति. इति श्रुत्वा रुष्टो नृपः प्रातः समवसरणे समागत्य श्रीवीरप्रभुमपृच्छत्, भगवन् ! मम प्रिया सा चेल्लणा किं सती वा असती वर्तते ? भगवानुवाच, भो श्रेणिक ! सा त्वदीया चेल्लणा राज्ञी महासती वर्तते. एवं सर्वा अपि तव पत्न्यः सत्य एव संति. तव चेतसि च तस्या वचनतो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यः संदेहः समुत्पन्नस्तत्समाधानं शृणु ? ह्यस्तने दिनेऽत्र समागच्छता त्वया तया चेल्लणया राज्ञ्या सह कायोत्सर्गस्थो यो मुनिर्वंदितस्तमेव मुनिं संस्मृत्य तया केवलं कृपयैव स्वप्नावस्थायां जल्पितं, अहो! अस्मिन् कराले शीतकाले तस्य निष्प्रावरणस्य मुनेः काऽवस्था भविष्यतीति. परं तस्या मनसि कोऽपि दुश्चितनोयो विकारो नास्ति. एवं गतसंशयः श्रेणिकभूपालो निजावासे समेत्य तां चेल्लणामधिकं सन्मानयामास. एवं श्रीवीरोक्तं धर्मं चिरमाराध्य सा महासती चेल्लणा कियता कालेन श्रीवीरप्रभुपार्श्वे दीक्षां गृहीत्वा क्रमेण दुस्तपं तपस्तप्त्वा केवलज्ञानमासाद्य प्रक्षीणनिखिलकर्मा मुक्तिं गता. सा सुज्येष्टा साध्व्यपि शुद्धं चारित्रमाराध्य केवलज्ञानयुता मुक्तिं गता. ॥ इति श्रीचेल्लणामहासतीचरित्रं समाप्तं ॥श्रीरस्तु॥

आ चरित्र श्रीशुभशीलगणीजीए रचेलां कथाकोष नामना ग्रंथमांथी उद्धरीने तेनी मूलभाषामां बनता प्रयासे सुधारो वधारो करी जामनगरनिवासी पंडित श्रावक-हीरालाल हंसराजे स्वपरना श्रेयने माटे पोताना श्रीजैनभास्करोदय प्रेसमां छापीने प्रसिद्ध कर्युं.

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust





P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

7318

## ॥ इति श्रीचेल्लणामहासतीचरित्रं समाप्तम् ॥

महावीर जैन आराधना केन्द्र, कोबा
गांधीनगर पिन-382009

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust